# केन्द्रीयसंस्कृतविश्वविद्यालयः

## विवेकानन्दजयन्त्युत्सवः

**12/01/2024**

कुलपतेर्वाक् ......

**उत्तिष्ठत विकसितराष्ट्रविकासाय उद्यमशीलाः भवत।**

प्रो. श्रीनिवासवरखेडी




अस्माकं देशः प्राचीनोऽपि अभिनवोऽपि। अस्य देशस्य इतिहासः अद्वितीयः वर्तते। केचन स्वतन्त्रभारतस्य अस्य शतम् अपि वर्षाणि न अतीतानि इत्यतः तरुणदेशः इति कथयन्ति। अपरे अस्य इतिहासं दृष्ट्वा प्राचीनदेशः इति निगदन्ति। एतादृशे विशिष्टे देशे वीरपुरुषस्य विवेकानन्दस्य जन्म जातम्। विवेकानन्दजयन्त्युत्सवमपि अधुना आचरामः।

अस्मिन् भरतखण्डे लब्धजन्मनः वीरसंन्यासिनः विवेकानन्दस्य वाणीं तस्य जयन्त्युत्सवे सश्रद्धं स्मरामो वयम्। उत्तिष्ठत जाग्रत प्राप्य वरान् निबोधत इति विवेकानन्दस्य सम्बोधनं तरुणान् उद्दिश्य एव। सः महापुरुषः तरुणः सन्नेव कीर्तिशेषः अभवत् अपि। अतः तस्य वचनानि कर्माणि च सर्वदा तारुण्यपूर्णानि (नवनवीनानि ) एव भवन्ति।

राजनैतिकस्वातन्त्र्यविषयापेक्षया बौद्धिकस्वातन्त्र्यविषयः प्राथमिकः भवेत् इति विवेकानन्दस्य आशयः। तदनु अस्माकं विशिष्टोत्तरदायित्वनिर्वहणकालः समुपागतः वर्तते। अतः अस्माभिः जडवत् यान्त्रिककार्यकरणमात्रेण सन्तृप्तैः न भवितव्यम्। वयं क्रियाशीलाः वर्तामहे एव। परं क्रियाशीलता एव पर्याप्ता नास्ति। सर्वेषु उद्यमशीलता अपेक्षिता वर्तते। अतः 'उत्तिष्ठत जाग्रत प्राप्य वरान् निबोधत' इत्येतस्याः वाण्याः वास्तविकः आशयः सर्वैः विज्ञेयः। विवेकानन्दवचसः सारं गृहीत्वा 'उत्तिष्ठत विकसितराष्ट्रविकासाय उद्यमशीलाः भवत' इत्येनं सन्देशं अधुना सभामुखम् उपस्थापयितुम् अभिलषामि।

शतं तरुणान् यच्छन्तु अहं भारतं परिष्कृत्य प्रदास्यामि इति विवेकानन्दः असकृत् अवदत् । तदनु अस्माकं शतं छात्राः यदि विश्वविद्यालयस्य प्रगत्यै सन्ततम् उद्यमशीलाः भविष्यन्ति तर्हि विश्वविद्यालयस्य प्रगतिः द्रुतगत्या भविष्यति। एतद्विषये न केवलं केन्द्रीयसंस्कृतविश्वविद्यालयः अपि तु अन्ये विश्वविद्यालयाः विश्वविद्यालयस्थाश्च सर्वे आलोचयेयुः।

केन्द्रीयसंस्कृतविश्वविद्यालये विवेकानन्दयुवनिधेः प्रतिष्ठापनपुरस्सरं युवशक्तेः प्रोत्साहनार्थम् आर्थिकसहयोगं प्रदातुं सम्भूय यतामहे। शैक्षिकगुणोत्कर्षवर्षेऽस्मिन् (2023-24) शैक्षिकगुणोत्कर्षनामकस्य पुस्तकस्य लोकार्पणम् अधुना विहितम्। अस्य सम्पादकाय लेखकेभ्यः परामर्शकेभ्यः समीक्षकेभ्यश्च शुभाशयाः। एतादृशः विकासपरप्रयासः प्राध्यापकैः संशोधकैश्च अनुवर्तनीयः।






समेषां शुभं भवतु।

**वार्तालेखः -**

डा. गणेश ति. पण्डितः

उपनिदेशकः ( वि.प्र.)